# हनुमान चालीसा संस्कृत

## दोहा

हृद्दर्पणं नीरजपादयोश्च गुरोः पवित्रं रजसेति कृत्वा ।
फलप्रदायी यदयं च सर्वम् रामस्य पूतञ्च यशो वदामि ॥

स्मरामि तुभ्यम् पवनस्य पुत्रम् बलेन रिक्तो मतिहीनदासः ।
दूरीकरोतु सकलं च दुःखम् विद्यां बलं बुद्धिमपि प्रयच्छ ॥

## चौपाई

जयतु हनुमद्देवो ज्ञानाब्धिश्च गुणागरः ।
जयतु वानरेशश्च त्रिषु लोकेषु कीर्तिमान् ॥

दूतः कोशलराजस्य शक्तिमांश्च न तत्समः ।
अञ्जना जननी यस्य देवो वायुः पिता स्वयम् ॥

हे वज्राङ्ग महावीर त्वमेव च सुविक्रमः ।
कुत्सितबुद्धिशत्रुस्त्वम् सुबुद्धेः प्रतिपालकः ॥

काञ्चनवर्णसंयुक्तः वासांसि शोभनानि च ।
कर्णयोः कुण्डले शुभ्रे कुञ्चितानि कचानि च ॥

वज्रहस्ती महावीरः ध्वजायुक्तस्तथैव च ।
स्कन्धे च शोभते यस्य मुञ्जोपवीतशोभनम् ॥

Hanuman
www.hanumanji.com

Hanuman

www.hanumangi.com

नेत्रत्रयस्य पुत्रस्त्वं केशरीनन्दनः खलु ।
तेजस्वी त्वं यशस्ते च वन्द्यते पृथिवीतले ॥

विद्यावांश्च गुणागारः कुशलोऽपि कपीश्वरः ।
रामस्य कार्यसिद्ध्यर्थम् उत्सुको सर्वदैव च ॥

राघवेन्द्रचरित्रस्य रसज्ञः सः प्रतापवान् ।
वसन्ति हृदये तस्य सीता रामश्च लक्ष्मणः ॥

वैदेही सम्मुखे तेन प्रदर्शितस्तनुः लघुः ।
लङ्का दग्धा कपीशेन विकटरूपधारिणा ।

हताः रूपेण भीमेन सकलाः रजनीचराः ।
कार्याणि कोशलेन्द्रस्य सफलीकृतवान् कपिः ॥

जीवितो लक्ष्मणस्तेन खल्वानीयौषधम् तथा
रामेण हर्षितो भूत्वा वेष्टितो हृदयेन सः ॥

प्राशंसत् मनसा रामः कपीशं बलपुङ्गवम् ।
प्रियं समं मदर्थं त्वम् कैकेयीनन्दनेन च ॥

यशो मुखैः सहस्रैश्च गीयते तव वानर ।
हनुमन्तं परिष्वज्य प्रोक्तवान् रघुनन्दनः ॥

Hanuman
www.hanumangi.com

www.hanumangi.com

सनकादिसमाः सर्वे देवाः ब्रह्मादयोऽपि च।
भारतीसहितः शेषो देवर्षिः नारदः खलु॥

कुबेरो यमराजश्च दिक्पालाः सकलाः स्वयम्।
पण्डिताः कवयः सर्वे शक्ताः न कीर्तिमण्डने॥

उपकृतश्च सुग्रीवो वायुपुत्रेण धीमता।
वानराणामधीपोऽभूद् रामस्य कृपया हि सः॥

तवैव चोपदेशेन दशवक्त्रसहोदरः।
प्राप्नोति नृपत्वं सः जानाति सकलं जगत्॥

योजनानां सहस्राणि दूरे भुवः स्थितो रविः।
सुमधुरं फलं मत्वा निगीर्णः भवता पुनः॥

मुद्रिकां कोशलेन्द्रस्य मुखे जग्राह वानरः।
गतवानब्धिपारं सः नैतद् विस्मयकारकम्॥

यानि कानि च विश्वस्य कार्याणि दुष्कराणि हि।
भवद्कृपाप्रसादेन सुकराणि पुनः खलु॥

द्वारे च कोशलेशस्य रक्षको वायुनन्दनः।
तवानुज्ञां विना कोऽपि न प्रवेशितुमर्हति॥

Hanuman www.hanumangi.com

लभन्ते शरणं प्राप्ताः सर्वाण्येव सुखानि च ।
भवति रक्षके लोके भयं मनाग् न जायते ॥

समर्थो न च संसारे वेगं रोद्धुं बली खलु ।
कम्पन्ते च त्रयो लोकाः गर्जनेन तव प्रभो ॥

श्रुत्वा नाम महावीरं वायुपुत्रस्य धीमतः ।
भूतादयः पिशाचाश्च पलायन्ते हि दूरतः ॥

हनुमन्तं कपीशं च ध्यायन्ति सततं हि ये ।
नश्यन्ति व्याधयः तेषां पीडाः दूरीभवन्ति च ॥

मनसा कर्मणा वाचा ध्यायन्ति हि ये जनाः ।
दुःखानि च प्रणश्यन्ति हनुमन्तम् पुनः पुनः ॥

नृपाणाञ्च नृपो रामः तपस्वी रघुनन्दनः ।
तेषामपि च कार्याणि सिद्धानि भवता खलु ॥

कामान्यन्यानि च सर्वाणि कश्चिदपि करोति यः ।
प्राप्नोति फलमिष्टं सः जीवने नात्र संशयः॥

कृतादिषु च सर्वेषु युगेषु सः प्रतापवान् ।
यशः कीर्तिश्च सर्वत्र दोदीप्यते महीतले ॥

Hanuman www.hanumangi.com

साधूनां खलु सन्तानां रक्षयिता कपीश्वरः।
असुराणाञ्च संहर्ता रामस्य प्रियवानर॥

सिद्धिदो निधिदः त्वञ्च जनकनन्दिनी स्वयम्।
दत्तवती वरं तुभ्यं जननी विश्वरूपिणी॥

कराग्रे वायुपुत्रस्य चौषधिः रामरूपिणी।
रामस्य कोशलेशस्य पादारविन्दवन्दनात्॥

पूजया मारुतपुत्रस्य नरः प्राप्नोति राघवम्।
जन्मनां कोटिसङ्ख्यानां दूरीभवन्ति पातकाः॥

देहान्ते च पुरं रामं भक्ताः हनुमतः सदा।
प्राप्य जन्मनि सर्वे हरिभक्ताः पुनः पुनः॥

Hanuman www.hanumangi.com

देवानामपि सर्वेषां संस्मरणं वृथा खलु।
कपिश्रेष्ठस्य सेवा हि प्रददाति सुखं परम्॥

करोति सङ्कटं दूरं सङ्कटमोचनः कपिः।
नाशयति च दुःखानि केवलं स्मरणं कपेः॥

जयतु वानरेशश्च जयतु हनुमद् प्रभुः।
गुरुदेवकृपातुल्यम् करोतु मम मङ्गलम्॥

श्रद्धया येन केनापि शतवारं च पठ्यते ।
मुच्यते बन्धनाच्छीघ्रम् प्राप्नोति परमं सुखम् ॥

स्तोत्रं तु रामदूतस्य चत्वारिंशच्च सङ्ख्यकम् ।
पठित्वा सिद्धिमाप्नोति साक्षी कामरिपुः स्वयम् ॥

सर्वदा रघुनाथस्य तुलसी सेवकः परम् ।
विज्ञायेति कपिश्रेष्ठ वासं मे हृदये कुरु ॥

## दोहा

विघ्नोपनाशी पवनस्य पुत्रः कल्याणकारी हृदये कपीश ।
सौमित्रिणा राघवसीतया च सार्धं निवासं कुरु रामदूत ॥

## संस्कृतभाषायां हनुमानचालिसस्य लाभाः -

LEARN MORE

Hanuman
www.hanumangi.com

हनुमान चालीसा जपः भगवान् हनुमानस्य महिमा स्मरणस्य प्रभावी साधनम् अस्ति। अस्य नियमितजपः भक्तानां साहसं, आत्मविश्वासं, मानसिकं शान्तिं च ददाति। हनुमान चालीसा इत्यस्य 40 श्लोकानां निरन्तरजपः भक्तानां शारीरिक-मानसिक-दुःखानां मुक्तिं करोति, नकारात्मकशक्तेभ्यः च सुरक्षितान् करोति।

हनुमानजी-पूजायाः विशेषदिनानि इति मङ्गलवासरे, शनिवासरे च विशेषतया हनुमानचालीसा जप्यते।

जपेन भक्ताः हनुमत् जी इत्यस्य आशीर्वादं शक्तिं च प्राप्तुं शक्नुवन्ति। अस्मिन् हनुमत्जी इत्यस्य भगवतः रामस्य प्रति निःस्वार्थभक्तिः, सेवा च वर्णिता अस्ति, येन भक्तानाम् समर्पणस्य निष्ठायाः च मार्गः अपि दर्शितः अस्ति।

कठिनसमये हनुमानचालीसा जपेन भयं दूरं भवति, रोगेभ्यः निवृत्तिः भवति, जीवने सकारात्मकशक्तिः च प्रविशति इति विश्वासः अस्ति।

यदि भवान् हनुमान् भगवान् प्रसन्नं कर्तुम् इच्छति, तस्य आशीर्वादं च प्राप्तुम् इच्छति तर्हि प्रातः वा सायं वा हनुमत् चालीसा पठतु।

Hanuman
www.hanumangi.com

**Hanuman Ji Ka Mantra**

**Bajrang Baan Hindi**

**Hanuman Ji Ki Aarti**

यदि आप भगवान हनुमान जी के भक्त हैं तो समुदाय में शामिल हों यदि आप हनुमान जी के बारे में अधिक जानना चाहते हैं तो नीचे दिए गए बटन पर क्लिक करके हनुमान जी की कम्युनिटी से जुड़ें।

**JOIN COMMITTEE**

Hanuman

www.hanumangi.com

अगर आपको इस पीडीएफ में हनुमान जी के बारे में जानकारी मिली है और जानकारी अच्छी लगी है तो आप हमारी hanumangi.com वेबसाइट के लिए योग दान करें और hanumangi.com वेबसाइट को सबसे बेहतर बनाने में हमारी मदद करें। अगर आप हनुमान जी की और जानकारी पीडीएफ में चाहते हैं तो हमारी मदद करें।

**Donate Now**

Hanuman

**UPI Id:**
**hanumangi.com@ybl**

www.hanumangi.com